## मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः । (१८१/३८८७)

मन्नन्तं क्तिन्नन्तं [1]व्याख्यान शयन स्थान इत्येतानि याजकादयः क्रीतशब्दश्चोत्तरपदमन्तोदात्तं भवति ।

मन् – रथवर्त्म । शकटवर्त्म । क्तिन् – पाणिनिकृतिः । आपिशलिकृतिः । व्याख्यान – [2]ऋगयनव्याख्यानम् । छन्दोव्याख्यानम् । शयन – राजशयनम् । ब्राह्मणशयनम् । आसन – राजासनम् । [3]ब्राह्मणासनम् । स्थान – [4]गोस्थानम् । अश्वस्थानम् । याजकादिः – ब्राह्मणयाजकः । [5]क्षत्रिययाजकः । [6]ब्राह्मणपूजकः । क्षत्रियपूजकः । याजकादयो ये 'याजकादिभिश्च' (२.२.९/७०३) इति षष्ठीसमासार्थाः पठ्यन्ते त एवेह गृह्यन्ते । क्रीत – गोक्रीतः । [7]अश्वक्रीतः । कृत्स्वरापवादोऽयं योगः । क्रीतशब्दे तु 'तृतीया कर्मणि' (६.२.४८/३७८२) इत्यस्यापवादः । व्याख्यानशयनासनस्थानानामभावकर्मार्थं [8]ग्रहणम् । कारकात् इत्येव, प्रकृतिः । प्रहृतिः ॥

## सप्तम्याः पुण्यम् । (१८२/३८८६)

सप्तम्यन्तात् परं पुण्यम् इत्येतदुत्तरपदमन्तोदात्तं भवति । अध्ययने पुण्यम् अध्ययनपुण्यम् । [9]वेदे पुण्यम् वेदपुण्यम् । सप्तमी (२.१.४०/७१७) इति योगविभागात् समासः । तत्पुरुषे तुल्यार्थ (६.२.२/३७३६) इति पूर्वपदकृतिस्वरत्वं प्राप्तम् इत्यन्तोदात्तत्वं विधीयते । उणादीनां तु व्युत्पत्तिपक्षे (उ. ७०३) कृत्स्वरेणाद्युदात्तः (फि. सू. २६) पुण्यशब्दः स्यात् इति । सप्तम्याः इति किम् ? वेदेन पुण्यम् वेदपुण्यम् ॥

## ऊनार्थकलहं तृतीयायाः । (१८३/३८८७)

ऊनार्थान्युत्तरपदानि कलहशब्दश्च तृतीयान्तात् पराण्यन्तोदात्तानि भवन्ति । माषोनम् । कार्षापणोनम् । माषविकलम् । कार्षापणविकलम् । कलह–असिकलहः । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादो योगः । अत्र केचिद् अर्थे इति स्वरूपग्रहणमिच्छन्ति । धान्येनार्थो धान्यार्थः । ऊनशब्देनैव त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव [10]तृतीयासमासपरिग्रहे सिद्धे तृतीयाग्रहणं विस्पष्टार्थम् ॥

## मिश्रं चानुपसर्गमसन्धौ । (१८४/३८८८)

[11]तृतीया इति वर्तते । मिश्र इत्येतदुत्तरपदमनुपसर्गं [12]तृतीयान्तात् परमन्तोदात्तं भवति असन्धौ गम्यमाने । गुडमिश्राः । तिलमिश्राः । सर्पिर्मिश्राः । मिश्रम् इति किम् ? गुडधानाः । अनुपसर्गम् इति किम् । गुडसंमिश्राः । इहानुपसर्गग्रहणं ज्ञापकमन्यत्र मिश्रगहणे सोपसर्गग्रहणस्य । तेन मिश्रश्लक्ष्णैः (२.१.३१/६९३) इति सोपसर्गेणापि मिश्रशब्देन तृतीयासमासो भवति । असन्धौ इति किम् ? ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहितः ऐकार्थ्यमापन्नः । सन्धिः इति हि पणबन्धेन ऐकार्थ्यमुच्यते । केचित् पुनराहुः गृह्यमाणविशेषा प्रत्यासत्तिः

---

1. व्याख्यान नास्ति फ. 2. ऋगयनम् ब, उदाहरणमिदं नास्ति क.ड. 3. ब्राह्मणशयनम् ग, उदाहरणमिदं नास्ति फ. 4. गोस्थानम् नास्ति फ. 5. क्षत्रिययाजकः नास्ति क. 6. उदाहरणमिदं नास्ति क.फ. 7. अश्वक्रीतः नास्ति फ. 8. वचनम् फ. 9. वेदे पुण्यम् नास्ति फ. 10. तृतीयासमासे ह. 11. तृतीयायाः ड. 12. तृतीयान्तात् नास्ति ग.